## सुहृद्दुर्हृदौ मित्रामित्रयोः। (१५०/८८८)

सुहृत् दुर्हृत् इति [1]निपात्यते यथासङ्ख्यं मित्रामित्रयोरभिधेययोः। सुशब्दात् परस्य हृदयशब्दस्य हृद्भावो निपात्यते बहुव्रीहौ[2], तथा दुःशब्दात् [3]परस्य। शोभनं हृदयम् अस्य सुहृत् मित्रम्। दुष्टं हृदयमस्य दुर्हृत् अमित्रम्। मित्रामित्रयोः इति किम्? सुहृदयः [4]कारुणिकः। दुर्हृदयः चोरः॥

## उरःप्रभृतिभ्यः कप्। (१५१/८८९)

उरः[5]प्रभृत्यन्तात् बहुव्रीहेः कप्प्रत्ययो भवति[6]। व्यूढम् उरः अस्य व्यूढोरस्कः। प्रियसर्पिष्कः। अवमुक्तोपानत्कः। पुमान् अनड्वान् पयः नौः लक्ष्मीः इति विभक्त्यन्ताः पठ्यन्ते, न प्रातिपदिकानि। तत्रेदं प्रयोजनम् – एकवचनान्तानामेव ग्रहणम् [7]इह विज्ञायेत, द्विवचनबहुवचनान्तानां मा भूत् [8]इति। तत्र[9] 'शेषाद् विभाषा' (५.४.१५४/८९१) इति विकल्प एव भवति [10]इति। [11]द्विपुमान्, द्विपुंस्कः। बहुपुमान्, बहुपुंस्कः[12]।

उरस्। सर्पिस्। उपानह्। पुमान्। अनड्वान्। नौः। पयः। लक्ष्मीः। दधि। मधु। शालि। 'अर्थान् नञः' (ग.सू. १५९) अनर्थकः॥

## इनः स्त्रियाम्। (१५२/८९०)

इन्नन्ताद् बहुव्रीहेः कप् प्रत्ययो भवति[13] स्त्रियां [14]विषये। बहवो दण्डिनः अस्यां शालायां बहुदण्डिका शाला। बहुच्छत्त्रिका। बहुस्वामिका नगरी। बहुवाग्मिका सभा। स्त्रियाम् इति किम्? बहुदण्डी राजा, बहुदण्डिकः। 'शेषाद्विभाषा' (५.४.१५४/८९१) इत्येतद् भवति॥

## नद्यृतश्च। (१५३/८३३)

नद्यन्तात् बहुव्रीहेः ऋकारान्तात् च कप् प्रत्ययो भवति[15]। बह्व्यः कुमार्य अस्मिन् देशे बहुकुमारीकः देशः। बहुब्रह्मबन्धूकः। ऋतः खल्वपि – [16]बहुकर्तृकः। तकारः [17]मुखसुखार्थः॥

## शेषाद् विभाषा। (१५४/८९१)

यस्माद् बहुव्रीहेः समासान्तो न विहितः स शेषः, तस्माद्[18] विभाषा कप् प्रत्ययो भवति[19]। बह्व्यः खट्वाः अस्मिन् बहुखट्वकः। बहुमालकः। बहुवीणकः। बहुखट्वाकः। बहुमालाकः। बहुवीणाकः। [20]बहुखट्वः। बहुमालः। बहुवीणः। कथम् अनृक्कं साम, बह्वृक्कं सूक्तम् इति, यावता विहितोऽत्र सामान्येन समासान्तः ऋक्पूः (५.४.७४/९४०) इति। नैतदस्ति। विशेषे [21]स इष्यते, अनृचो माणवको ज्ञेयो बह्वृचश्चरणाख्यायाम् (म.भा. २.४४४) इति। शेषात् इति किम्? प्रियपथः। प्रियधुरः॥

---

1. शब्दौ निपात्येते क.ड.फ. 2. समासे इत्यधिकम् ड. 3. परस्य नास्ति फ, च क. 4. साधुः क.ड. 5. प्रभृतिकात् फ. 6. समासान्तः इत्यधिकम् ब.क.ड.फ. 7. यथा ड. 8. इति नास्ति क.फ. 9. हि इत्यधिकम् क.ड.फ. 10. इति नास्ति फ. 11. द्विपुमान् नास्ति फ. 12. इति इत्यधिकम् ह. 13. समासान्तः इत्यधिकम् ब.क.ड.ह. 14. अभिधेयायाम् ब.क.ड.फ. 15. समासान्तः इत्यधिकम् ब.ड. 16. बहुकर्तृकम् फ. 17. सुलभोच्चारणार्थः ग.ह. 18. शेषात् इत्यधिकम् क.फ. 19. समासान्तः इत्यधिकम् फ. 20. बहुखट्वः नास्ति ड. 21. हि स उच्यते क.